CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥ श्री ॥ अथ हरितालिकापूजाप्रारंभः ॥ श्री ॥

Kashi Maharani Collection: Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीगणेशायनमः॥अथहरितालिकापूजाप्रारंभः॥सु
मुखश्चेत्यादि०॥ममइहजन्मनिजन्मांतरेचसमस्तपा
पक्षयपूर्वकसप्तजन्मराज्यसौभाग्यादिवृद्धयेउमा
महेश्वरसापूज्यतासिध्यर्थंहरितालिकापूजनंकरि
ष्ये॥आदौगौरीयुक्तंमहेश्वरंपूजयिष्ये॥कलशपूज
नादिकरिष्ये॥अथध्यानं॥पीतकौशेयवसनांहेमाभां
कमलासनां॥भक्तानांवरदांनित्यंपार्वतीचिंतयाम्यहं॥मंदारमालांकलिकालिकांचैकपालमालांकितशे
खरायदिव्यांबरायैचदिगंबरायनमःशिवायैचनमः

Kashi Maharaja Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शिवाय॥इतिध्यानं॥हेवदेविसमागछ प्रार्थयेहंजग
न्मये॥इमांमयाकृतांपूजांगृहाणसुरसत्तमैः॥शिवगौ
रीभ्यांनमः॥आवाहनं॥भवानीत्वंमहादेवीसर्वसोभा
ग्यदायके॥अनेकरत्नसंयुक्तमासनंप्रतिगृह्यतां॥
आसनं॥सुचारुशीतलंदिव्यंनानागंधसमन्वितं॥
गृहाणदेवदेवेशिमहादेविनमोस्तुते॥पाद्यं॥श्रीपा
र्वतीमहाभागेशंकरप्रियवादिनी॥अर्घ्यंगृहाणक
ल्याणीभर्तासहपतिव्रते॥अर्घ्यं॥गंगाजलंसमानी
तंसुवर्णकलशोस्थितं॥आचंम्यतांमहाभागेरुद्रेण

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सहितेन घे॥आचमनीयं॥गंगासरस्वतीरेवापयोष्णीन
र्मराजलैः॥स्नापितोसिमयादेवतथाशांतिंकुरुघमे॥
स्नानं॥पंचामृतस्नानं॥सुरभिस्तुसमुत्पन्नंदेवानाम
पिदुर्लभं॥पयोदद्यामिदेवेशस्नानार्थंप्रतिगृह्यतां॥
पयस्नानं॥चंद्रमंडलसंकाशंसर्वदेवप्रियंदधि॥द
ध्नादद्यामिदेवेशस्नानार्थंप्रतिगृह्यतां॥दधिस्नानं
॥आज्यंसुराणामाहारमाज्यंयज्ञेप्रतिष्ठितं॥आज्यं
परमपवित्रंस्नानार्थंप्रतिगृह्यतां॥घृतस्नानं॥स
र्वौषधिसमुत्पन्नंपीयूषःसदृशंदधि॥मधोदद्यामिदे

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वेशस्नानार्थंप्रतिगृह्यतां॥मधुस्नानं॥इक्षुदंडसमुद्
भूतंशार्करामधुराविभो॥देवदेवप्रियंस्वादुस्नानार्थंप्र
तिगृह्यतां॥शार्करास्नानं॥षष्ठेनगंधोदकस्नानं॥गंगा
दिभ्योनदीभिश्चसमानीतमिदंजलं॥स्नानार्थंतुम
यादेवीप्रीत्यातत्प्रतिगृह्यतां॥शुद्धोदकस्नानं॥पंचो
पचारपूजांकृत्वा॥अभिषेकंकुर्यात्॥स्नानांतरेणआ
चमनीयं॥क्षीरोदमथनोद्भूतेचंद्रलक्ष्मीसहोदरे॥गृ
ह्यतांपरिधानार्थंदमंक्षोमंवरंशुभे॥कंचुकी॥वस्त्र
चसोमदैवत्यंलज्जायास्तुनिवारणं॥मयोपपादितंतु

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ह॰पू॰ ३

ष्यंवाससीप्रतिगृह्यतां॥वस्त्रं॥कार्पासंसूत्रमुत्तमंब्रह्म
सूत्रंकृतंमया॥ब्रह्मग्रंथिकृतंतस्योत्तरीप्रतिगृह्यतां॥
यज्ञोपवीतं॥हरिद्रोपीतवर्णाभांकामिनींकामसंभवां
॥हरिद्रेयाचितेदेवीसौभाग्यार्थंप्रयछमे॥हरिद्रां॥कुं
कुमंकामुकंदिव्यंस्त्रीणांभालस्यभूषणं॥कुंकुमंचर्चि
तेदेवीसौभाग्यार्थंप्रयछमे॥कुंकुमं॥कज्जलंदीपसंभू
तंस्त्रीणांलोचनभूषणं॥नेत्रयोर्भूषणार्थायकज्जलं
प्रतिगृह्यतां॥कज्जलं॥कर्पूरागरुसंयुक्तंकुंकुमादिस ३
मन्वितं॥कस्तूरिकासमायुक्तंचंदनंप्रतिगृह्यतां॥चं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नं॥रंजिताः कुसुमोघेनअक्षताःश्वातिशोभनाः॥ममै
षांहेविशानेनप्रसन्नाभवपार्वती॥अक्षताः॥मल्लिका
बकुलचंपकपाटलाब्जपुन्नागजातिकरवीररसाल
पुष्पैः॥बिल्वप्रवालतुलसीदलमालतीभिःस्वांपूज
याभिजगदीश्वरीमेप्रसीद॥पुष्पं॥अथांगपूजा॥भ
वान्यैनमः॥पादौपूजयामि॥सर्वाण्यैनमः॥जंघेपू०
॥सुंदर्यैनमः॥उदरंपू०॥भगवत्यैनमः॥हृदयंपू०॥का
मदायैनमः॥स्तनौपू०॥शिवप्रियायैनमः॥कुक्षौपू०
॥लक्ष्म्यैनमः॥बाहुंपू०॥पद्महस्तायैनमः॥हस्तौपू०॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ह॰पू॰ ४

मंगलमोदिन्येनमः॥कंठंपूजयामि॥विरूपायेनमः॥मु
खंपू॰॥ज्ञानरूपायेनमः॥नेत्रेपू॰॥रमायेनमः॥कर्णौपू॰
॥कल्याण्येनमः॥भालंपू॰॥दुर्गायेनमः॥शिरःपू॰॥पा
र्वत्येनमः॥सर्वांगंपूजयामि॥अथशंकरपूजा॥महा
देवायनमः॥पादौपू॰॥कृत्तिवासायनमः॥जानुंपू॰॥
पिनाकिनेनमः॥कटिंपू॰॥शर्वायनमः॥नाभिंपू॰॥शं
भवेनमः॥हृदयंपू॰॥कंठेशायनमः॥कंठंपू॰॥त्रिपुरां
तकायनमः॥भालंपू॰॥गिरीशायनमः॥नेत्रेपू॰॥
गिरिजायनमः॥कर्णौपू॰॥भालचंद्रायनमः॥शिरः ४

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पू०॥सर्वेश्वरायनमः॥सर्वांगंपू०॥अधिपत्रिपूजा॥उमा
येनमः॥अपामार्गपत्रंसमर्पयामि॥गौर्यैनमः॥दूर्वा
पत्रंस०॥दिव्येनमः॥धत्तूरपत्रं०॥लोकवंद्येनमः॥बिल्व
पत्रंसमर्पयामि॥कात्येनमः॥पुन्नागपत्रं०॥शिवायेन
मः॥कदंबपत्रं०॥भवान्येनमः॥अतपत्रं०॥रुद्राण्येन
मः॥दाडिमिपत्रं०॥सर्वाण्येनमः॥रसालपत्रं०॥मंगल
दात्र्येनमः॥मल्लिकापत्रं०॥पुत्रदायेनमः॥पाटलीप
त्रं०॥वस्त्रेनैतिरसोधूपोगंधाढ्योगंधउत्तम॥आघ्रे
यःसर्वदेवानांधूपोयंप्रतिगृह्यतां॥धूपं॥आज्यंचव

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

र्तिसंभूतंवह्निनायोजितंमया॥हीपंगृहाणदेवेशत्रैलो
क्यंत्रिमिरापह॥हीपं॥नैवेद्यंगृह्यतांदेवभक्तिंमेह्यच
लांकुरु॥ईप्सितंमेवरंदेहिपरत्रचपरांगतिं॥नैवेद्यं॥
उत्तरापोशानं॥करोद्वर्तनं॥इदंफलंमयादेवस्थापित
पुरतस्तव॥तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि॥
फलं॥पूगीफलंमहद्दिव्यंनागवल्यादलैर्युतं॥कर्पू
रैलासमायुक्तंतांबूलंप्रतिगृह्यतां॥मुखवासार्थं
तांबूलं॥हिरण्यगर्भगर्भस्तंहेमबीजंविभावसो॥
अनंतपुण्यफलदमतःशांतिंप्रयच्छमे॥दक्षिणां॥ ५

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

उत्तरदीपं॥नीराजयामिदेवेशत्रैलोक्यतिमिरापह॥
आर्त्तिक्याहंकरिष्यामिप्रसीदपरमेश्वर॥कर्पूरदीपं॥
कर्पूरखंडसंयुक्तंदीपंप्रज्वलितंमया॥गृहाणभ
क्त्याहदेवेशत्रैलोक्यंमगलकुरु॥निकानिचपापानि
जन्मांतरकृतानिच॥तानितानिविनश्यंतिप्रदक्षि
णपदे॥प्रदक्षिणं॥सर्वमंगलमांगल्येशिवेसर्वा
र्थसाधिके॥शरण्येत्र्यंबकेगौरीनारायणीनमो
स्तुते॥नमस्कारान्॥नानाविधानिपुष्पाणिस्व
हस्तेनाहतानिच॥पुष्पांजलिंकरिष्यामिप्रसीदप

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रमेश्वरी॥पुष्पांजलिं॥सौभाग्यवायनं॥ततोवैणवपात्रे
तुसौभाग्यद्रव्यमाक्षिपेत्॥अन्नंकंचुकिसंयुक्तंसव
स्त्रफलदक्षिणां॥वायनंगौरिविप्रायदद्मिप्रीतयेत
व॥सौभाग्यारोग्यकामानांसर्वसंपत्समृद्धये॥गौरी
गिरिशपुष्यर्थंवायनंतेददाम्यहं॥इतिमंत्राभ्यांवाय
नंदद्यात्॥आवाहनंनजानामिनजानामितवार्चनं॥
पूजांचैवनजानामिक्षंमितांपरमेश्वर॥गौतंदुःखंगतं
पापंगतंदारिद्र्यमेवच॥आगताःसुखसंपत्तिःपुण्या
हंतवदर्शनात्॥अन्यथाशरणंनास्तित्वमेवशरणं

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मम॥तस्मात्कारुण्यभावेनरक्षरक्षपरमेश्वर॥यत्कृतक
र्मणाश्रीशंकरेणसखिसहितहरितालिकाप्रीयतांनम
म॥इतिहरितालिकापूजासमाप्तः॥ ७॥ ७॥ ७॥ ७
ॐतत्सद्ब्रह्मार्पणमस्तु॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥
विल्वैश्चार्घ्यं प्रवालैश्चकाफलैश्चपूगरत्नैश्चनारिकेल
पिप्पलगंधैः॥पुष्पाक्षतैर्युक्तंममोद्यहरितालिकेदत्तमेमार्घ्यंस
फलंकुरुत्व॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥अथहरितालिकापूजासमाप्तः॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi